## नवमः पाठः

# उज्जयिनी-दर्शनम्

## पञ्चमी विभक्तिः



उज्जयिनी मध्यप्रदेशस्य प्रसिद्धं दर्शनीयस्थानम् अस्ति। उज्जयिनी भोपालात् पश्चिमदिशि अस्ति। विविधेभ्यः प्रदेशेभ्यः जनाः उज्जयिनीम् आगच्छन्ति। कुम्भपर्वणि विदेशेभ्यः अपि बहवः जनाः आगच्छन्ति।

क्षिप्रानद्याः समीपे मुख्यदर्शनीयस्थानं महाकालमन्दिरं राजते। सर्वदा मन्दिरात् घण्टानादः श्रूयते। भक्तजनेभ्यः जयघोषः निःसरति। महाकालमन्दिरात् जनाः महागणेशमन्दिरं हरिसिद्धिमन्दिरं च गच्छन्ति। इतः चतुर्धाममन्दिरं समीपे एव अस्ति। ततः चिन्तामणगणपतिमन्दिरं मङ्गलनाथमन्दिरं, कालभैरवमन्दिरं च जनाः गच्छन्ति।

उज्जयिन्याः सर्वेषु भागेषु रमणीयस्थानानि सन्ति। यात्रिकाः मार्गदर्शकात् स्थानानां महत्त्वं जानन्ति। पञ्चक्रोशीयात्रायां स्थानात् स्थानं गच्छन्ति।

प्राचीनकालात् आरभ्य उज्जयिनीक्षेत्रं संस्कृतविद्याकेन्द्रम् अस्ति। सान्दीपनिआश्रमात् जनाः श्रीकृष्णस्य इतिहासं जानन्ति। उज्जयिन्याः राजाविक्रमादित्यस्य कालात् विक्रमसंवत्सरस्य गणना भवति। बहूनां कवीनां मुखेभ्यः एवं च कालिदासमुखात् अपि उज्जयिन्याः सौन्दर्यं वर्णितम् अस्ति। महाकालमहिमा यथा–

आकाशे तारकं लिङ्गं, पाताले हाटकेश्वरम्।
मर्त्यलोके महाकालं लिङ्गत्रयमुपास्महे।।

### शब्दार्थाः

| | | | |
|---|---|---|---|
| भोपालात् | = भोपाल से | पश्चिमदिशि | = पश्चिम दिशा में |
| विविधेभ्यः प्रदेशेभ्यः | = विविध प्रदेशों से | कुम्भपर्वणि | = कुम्भ पर्व में |
| राजते | = शोभायमान है | श्रूयते | = सुनाई देता है |
| निःसरति | = निकलता है | भागेषु | = भागों में |
| यात्रिकाः | = यात्रीगण | मार्गदर्शकात् | = मार्गदर्शक से |

सान्दीपनिआश्रमात् = सान्दीपनि आश्रम से          उज्जयिन्याः = उज्जयिनी का

मर्त्यलोके = भूलोक में

## अभ्यासः

१. एकवाक्येन उत्तरं लिखत–

(ख) उज्जयिनी कस्मात् नगरात् पश्चिमदिशि अस्ति?

(ख) उज्जयिन्याः मुख्यं दर्शनीयस्थानं किम् अस्ति?

(ग) कस्मात् जनाः श्रीकृष्णस्य इतिहासं जानन्ति?

(घ) महाकालमन्दिरात् जनाः कुत्र गच्छन्ति?

(ङ) कस्मात् विक्रमसंवत्सरस्य गणना भवति?

२. चित्रं दृष्ट्वा पञ्चमीविभक्तिरूपाणि लिखत–

यथा–  (विद्यालयः) बालकः विद्यालयात् आगच्छति।

(क)  (देवालयः) अर्चकः ...........आगच्छति।

(ख) 

(वाटिका) बालिका............आगच्छति।

(ग)  (नदी) मुनिः ...............आगच्छति।

(घ)  (क्षेत्रम्) कृषकः..............आगच्छति।

३. रेखाङ्कितपदस्य पञ्चमी–विभक्त्यां परिवर्तनं कृत्वा वाक्ये लिखत–

यथा- अश्वः सैनिकः पतति। अश्वात् सैनिकः पतति।

(क) हिमालयः गङ्गा प्रवहति।

(ख) बालकः सिंहः बिभेति।

(ग) वानरः शाखा कूर्दति।

(घ) छात्रः शाला आगच्छति।

(ङ) धार्मिकः काशी आगच्छति।

(च) महिला नदी जलम् आनयति।

(छ) प्रद्युम्नः गुरुकुलं प्रत्यागच्छति।

(ज) सज्जनः असत्यं बिभेति।

(झ) सुरेशः रुग्णं शीतम् रक्षति।

४. उचितपरिवर्तनेन पञ्चमी विभक्तिरूपाणि लिखत–

| | | शब्दाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| (अ) | यथा- | जन | जनात् | जनाभ्यां | जनेभ्यः |
| | (क) | प्राचीन | | | |
| | (ख) | आश्रम | | | |
| | (ग) | प्रदेश | | | |
| | (घ) | विदेश | | | |
| | (ङ) | मार्गदर्शकः | | | |

| | | शब्दाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| (ब) | यथा- | नगर | नगरात् | नगराभ्यां | नगरेभ्यः |
| | (क) | मन्दिर | | | |
| | (ख) | रमणीयस्थान | | | |
| | (ग) | क्षेत्र | | | |
| | (घ) | पुष्प | | | |
| | (ङ) | वन | | | |

| | | शब्दाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| (स) | यथा- | बालिका | बालिकायाः | बालिकाभ्यां | बालिकाभ्यः |
| | (क) | क्षिप्रा | | | |
| | (ख) | वाटिका | | | |
| | (ग) | पत्रिका | | | |
| | (घ) | यात्रा | | | |
| | (ङ) | सञ्चिका | | | |

| | | शब्दाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| (द) | यथा- | उज्जयिनी | उज्जयिन्याः | उज्जयिनीभ्यां | उज्जयिनीभ्यः |
| | (क) | नर्तकी | | | |
| | (ख) | गृहिणी | | | |
| | (ग) | कर्तरी | | | |
| | (घ) | लेखनी | | | |
| | (ङ) | अङ्कनी | | | |

योग्यताविस्तारः —

- 'तसिल्' (तः) प्रत्ययस्य प्रयोगेण सरलरूपेण एकवचने पञ्चमीविभक्तिप्रयोगः सम्भवति

| | | | | |
|---|---|---|---|---|
| यथा– विद्यालय | - | विद्यालयात् | - | विद्यालयतः |
| वाटिका | - | वाटिकायाः | - | वाटिकातः |
| काशी | - | काश्याः | - | काशीतः |
| उद्यानम् | - | उद्यानात् | - | उद्यानतः |

- अधोलिखितं श्लोकं कण्ठस्थीकुरुत। श्लोकात् पञ्चमीविभक्तिशब्दान् चिनुत–

वात्सल्यात् अभयप्रदानसमयात् आर्तार्तिनिर्वापणात्,
औदार्यात् अघशोषणात् अगणितश्रेयः पदप्रापणात्।
सेव्यः श्रीपतिरेक एव जगतामेतेऽभवन्साक्षिणः,
प्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्यहल्याध्रुवः।।